# રામરક્ષાસ્તોત્ર

ૐ શ્રી ગણેશાય નમઃ

અસ્ય શ્રીરામરક્ષાસ્તોત્રમન્ત્રસ્ય બુધકૌશિક ઋષિઃ

શ્રીસીતારામચન્દ્રો દેવતા અનુષ્ટુપ્છન્દઃ સીતા શક્તિઃ

શ્રીમાન્ હનુમાન્ કીલકં શ્રીરામચન્દ્રપ્રીત્યર્થે

રામરક્ષાસ્તોત્રજપે વિનિયોગઃ ।

અથ ધ્યાનમ્

ધ્યાયેદાજાનુબાહું ધૃતશરધનુષં બદ્ધપદ્માસનસ્થં

પીતં વાસો વસાનં નવકમલદલસ્પર્ધિનેત્રં પ્રસન્નમ્ ।

વામાંકારૂઢસીતામુખકમલમિલલ્લોચનં નીરદાભં

નાનાલંકારદીપ્તં દધતમુરુજટામંડલં રામચન્દ્રમ્ ॥

સ્તોત્રમ્

ચરિતં રઘુનાથસ્ય શતકોટિપ્રવિસ્તરમ્ ।

એકૈકમક્ષરં પુંસાં મહાપાતકનાશનમ્ ॥ ૧ ॥

ધ્યાત્વા નીલોત્પલશ્યામં રામં રાજીવલોચનમ્ ।

જાનકીલક્ષ્મણોપેતં જટામુકુટમંડિતમ્ ॥ ૨ ॥

સાસિતૂણધનુર્બાણપાણિં નક્તંચરાન્તકમ્ ।

સ્વલીલયા જગત્ત્રાતુમાવિર્ભૂતમજં વિભુમ્ ॥ ૩ ॥

રામરક્ષાં પઠેત્પ્રાજ્ઞઃ પાપઘ્નીં સર્વકામદામ્ ।

શિરો મે રાઘવઃ પાતુ ભાલં દશરથાત્મજઃ ॥ ૪ ॥

કૌશલ્યેયો દશૌ પાતુ વિશ્વામિત્રપ્રિયઃ શ્રુતી ।

ઘ્રાણં પાતુ મખત્રાતા મુખં સૌમિત્રિવત્સલઃ ॥ ૫ ॥

જિહ્વાં વિદ્યાનિધિઃ પાતુ કંઠં ભરતવન્દિતઃ ।

સ્કન્ધૌ દિવ્યાયુધઃ પાતુ ભુજૌ ભગ્નેશકાર્મુકઃ ॥ ૬ ॥

કરૌ સીતાપતિઃ પાતુ હૃદયં જામદગ્ન્યજિત્ ।
મધ્યં પાતુ ખરધ્વંસી નાભિં જામ્બવદાશ્રયઃ ।। ૭ ।।
સુગ્રીવેશઃ કટી પાતુ સક્થિની હનુમત્પ્રભુઃ ।
ઊરૂ રઘૂત્તમઃ પાતુ રક્ષઃકુલવિનાશકૃત્ ।। ૮ ।।
જાનુની સેતુકૃત્પાતુ જંઘે દશમુખાન્તકઃ ।
પાદૌ વિભીષણશ્રીદઃ પાતુ રામોઽખિલં વપુઃ ।। ૯ ।।
એતાં રામબલોપેતાં રક્ષાં યઃ સુકૃતી પઠેત્ ।
સ ચિરાયુઃ સુખી પુત્રી વિજયી વિનયી ભવેત્ ।। ૧૦ ।।
પાતાલભૂતલવ્યોમચારિણશ્છદ્મચારિણઃ ।
ન દ્રષ્ટુપમપિ શક્તાસ્તે રક્ષિતં રામનામભિઃ ।। ૧૧ ।।
રામેતિ રામભદ્રેતિ રામચન્દ્રેતિ વા સ્મરન્ ।
નરો ન લિપ્યતે પાપૈર્ભુક્તિં મુક્તિં ચ વિન્દતિ ।। ૧૨ ।।
જગજ્જૈત્રૈકમન્ત્રેણ રામનામ્નાભિરક્ષિતમ્ ।
યઃ કણ્ઠે ધારયેત્તસ્ય કરસ્થાઃ સર્વસિદ્ધયઃ ।। ૧૩ ।।
વજ્ર પંજરનામેદં યો રામકવચં સ્મરેત્ ।
અવ્યાહતાજ્ઞઃ સર્વત્ર લભતે જયમંગલમ્ ।। ૧૪ ।।
આદિષ્ટવાન્યથા સ્વપ્ને રામરક્ષામિમાં હરઃ ।
તથા લિખિતવાન્પ્રાતઃ પ્રબુદ્ધો બુધકૌશિકઃ ।। ૧૫ ।।
આરામઃ કલ્પવૃક્ષાણાં વિરામઃ સકલાપદામ્ ।
અભિરામસ્ત્રિલોકાનાં રામઃ શ્રીમાન્સ નઃ પ્રભુઃ ।। ૧૬ ।।
તરુણૌ રૂપસમ્પન્નૌ સુકુમારૌ મહાબલૌ ।
પુંડરીકવિશાલાક્ષૌ ચીરકૃષ્ણાજિનામ્બરૌ ।। ૧૭ ।।
ફલમૂલાશિનૌ દાન્તૌ તાપસૌ બ્રહ્મચારિણૌ ।
પુત્રૌ દશરથસ્યૈતૌ ભ્રાતરૌ રામલક્ષ્મણૌ ।। ૧૮ ।।
શરણ્યૌ સર્વસત્ત્વાનાં શ્રેષ્ઠૌ સર્વધનુષ્મતામ્ ।
રક્ષઃકુલનિહન્તારૌ ત્રાયેતાં નો રઘૂત્તમૌ ।। ૧૯ ।।

આત્તસજ્જધનુષાવિષુસ્પૃશાવક્ષયાશુગનિષંગસંગિનૌ

રક્ષણાય મમ રામલક્ષ્મણાવગ્રતઃ પથિ સદૈવ ગચ્છતામ્ ।। ૨૦ ।।

સન્નદ્ધઃ કવચી ખડ્ગી ચાપબાણધરો યુવા ।

ગચ્છન્મનોરથાન્નશ્ચ રામઃ પાતુ સલક્ષ્મણઃ ।। ૨૧ ।।

રામો દાશરથિઃ શૂરો લક્ષ્મણાનુચરો બલી ।

કાકુત્સ્થઃ પુરુષઃ પૂર્ણઃ કૌશલ્યેયો રઘૂત્તમઃ ।। ૨૨ ।।

વેદાન્તવેદ્યો યજ્ઞેશઃ પુરાણપુરુષોત્તમઃ ।

જાનકીવલ્લભઃ શ્રીમાનપ્રમેયપરાક્રમઃ ।। ૨૩ ।।

ઈત્યેતાનિ જપન્નિત્યં મદ્ભક્તઃ શ્રદ્ધયાન્વિતઃ ।

અશ્વમેધાધિકં પુણ્યં સમ્પ્રાપ્નોતિ ન સંશયઃ ।। ૨૪ ।।

રામં દૂર્વાદલશ્યામં પદ્માક્ષં પીતવાસસમ્ ।

સ્તુવન્તિ નામભિર્દિવ્યૈર્ન તે સંસારિણો નરાઃ ।। ૨૫ ।।

રામં લક્ષ્મણપૂર્વજં રઘુવરં સીતાપતિં સુન્દરમ્

કાકુત્સ્થં કરુણાર્ણવં ગુણનિધિં વિપ્રપ્રિયં ધાર્મિકમ્ ।

રાજેન્દ્રં સત્યસન્ધં દશરથતનયં શ્યામલં શાન્તમૂર્તિં

વન્દે લોકાભિરામં રઘુકુલતિલકં રાઘવં રાવણારિમ્ ।। ૨૬ ।।

રામાય રામભદ્રાય રામચન્દ્રાય વેધસે ।

રઘુનાથાય નાથાય સીતાયાઃ પતયે નમઃ ।। ૨૭ ।।

શ્રીરામ રામ રઘુનન્દન રામ રામ

શ્રીરામ રામ ભરતાગ્રજ રામ રામ ।

શ્રીરામ રામ રણકર્કશ રામ રામ

શ્રીરામ રામ શરણં ભવ રામ રામ ।। ૨૮ ।।

શ્રીરામચન્દ્રચરણૌ મનસા સ્મરામિ

શ્રીરામચન્દ્રચરણૌ વચસા ગૃણામિ ।

શ્રીરામચન્દ્રચરણૌ શિરસા નમામિ

શ્રીરામચન્દ્રચરણૌ શરણં પ્રપદ્યે ।। ૨૯ ।।

માતા રામો મત્પિતા રામચન્દ્રઃ

સ્વામી રામો મત્સખા રામચન્દ્રઃ ।

સર્વસ્વં મે રામચન્દ્રો દયાલુ-

ર્નાન્યં જાને નૈવ જાને ન જાને ॥ ૩૦ ॥

દક્ષિણે લક્ષ્મણો યસ્ય વામે ચ જનકાત્મજા ।

પુરતો મારુતિર્યસ્ય તં વન્દે રઘુનન્દનમ્ ॥ ૩૧ ॥

લોકાભિરામં રણરંગધીરં

રાજીવનેત્રં રઘુવંશનાથમ્ ।

કારુણ્યરૂપં કરુણાકરં તં

શ્રીરામચન્દ્રં શરણં પ્રપદ્યે ॥ ૩૨ ॥

મનોજવં મારુતતુલ્યવેગં

જિતેન્દ્રિયં બુદ્ધિમતાં વરિષ્ઠમ્ ।

વાતાત્મજં વાનરયૂથમુખ્યં

શ્રીરામદૂતં શરણં પ્રપદ્યે ॥ ૩૩ ॥

કૂજન્તં રામરામેતિ મધુરં મધુરાક્ષરમ્ ।

આરુહ્ય કવિતાશાખાં વન્દે વાલ્મીકિકોકિલમ્ ॥ ૩૪ ॥

આપદામપહર્તારં દાતારં સર્વસમ્પદામ્ ।

લોકાભિરામં શ્રીરામં ભૂયો ભૂયો નમામ્યહમ્ ॥ ૩૫ ॥

ભર્જનં ભવબીજાનામર્જનં સુખસમ્પદામ્ ।

તર્જનં યમદૂતાનાં રામરામેતિ ગર્જનમ્ ॥ ૩૬ ॥

રામો રાજમણિઃ સદા વિજયતે રામં રમેશં ભજે

રામેણાભિહતા નિશાચરચમૂ રામાય તસ્મૈ નમઃ ।

રામાન્નાસ્તિ પરાયણં પરતરં રામસ્ય દાસોઽસ્મ્યહં

રામે ચિત્તલયઃ સદા ભવતુ મે ભો રામ મામુદ્ધર ॥ ૩૭ ॥

રામ રામેતિ રામેતિ રમે રામે મનોરમે ।

સહસ્રનામ તત્તુલ્યં રામનામ વરાનને ॥ ૩૮ ॥

ઈતિ શ્રીબુધકૌશિકમુનિવિરચિતં શ્રીરામરક્ષાસ્તોત્રં સમ્પૂર્ણમ્ ।